# श्रीसोमनाथसंस्कृतयुनिवर्सिटी ,वेरावलम्

## सत्रान्तपरीक्षा – एप्रिल-२०१९

| | | |
|---|---|---|
| कक्षा- शास्त्रिप्रथमवर्षम्(SEM- 2) | **प्रश्नपत्रम् – ६** | गुणा: - ७० |
| विषय: - नव्यव्याकरणम् | **कोड – CC.1.2.4** | समय: - ११ त: ०२ |
| दिनाङ्क: - १६-०४-२०१९ | सन्दर्भग्रन्थः – वैयाकरणसिद्धान्तकौमुदी \| | |

.......................................................................................................

**प्रथमान्विति:**

**प्रश्नः-१ निम्नलिखितेषु सूत्रेषु द्वयो: सूत्रयो: सोदाहरणं व्याख्या कार्या |** १०

(१) स्तम्भुसिवुसहां चङि |

(२) तत्प्रयोजको हेतुश्च |

(३) धातो: कर्मण: समानकर्तृकादिच्छायां वा |

**प्रश्नः२ निम्नलिखितेषु केषाञ्चित् चतुर्णां प्रयोगाणां ससूत्रं सिद्धिः कार्या |** **१०**

(१) भावयति (२) पिपठिषति (३) अररम्भत् (४) मुमुषिषति

(५) धिप्सति (६) शाययति (७) स्थापयति (८) बुभूषति

**द्वितीयान्विति:**

**प्रश्नः-३ निम्नलिखितेषु सूत्रेषु द्वयो: सूत्रयो: सोदाहरणं व्याख्या कार्या |** **१०**

(१) धातोरेकाचो हलादे: क्रियासमभिहारे यङ् |

(२) यस्य हल: |

(३) यङोऽचि च |

**प्रश्नः-४ निम्नलिखितेषु केषाञ्चित् चतुर्णां प्रयोगाणां ससूत्रं सिद्धिः कार्या |** १०

(१) बोभूयते (२) अट्टायते (३) बोभूयिष्ट (४) सोसूत्रिता (५) अबोभोत्

(६) मोमुदीति (७) तोतोर्ति (८) मोमूर्त:

**तृतीयान्विति:**

**प्रश्नः-५ निम्नलिखितेषु सूत्रेषुः द्वयो: सूत्रयो: सोदाहरणं व्याख्या कार्या |** १०

(१) कण्ड्वादिभ्यो यक् |

(२) अशनायोदन्यधनाया बुभुक्षापिपासागर्धेषु |

(३) सुप आत्मन: क्यच् |

**प्रश्नः-६ निम्नलिखितेषु केषाञ्चित् चतुर्णां प्रयोगाणां ससूत्रं सिद्धिः कार्या |** १०

(१) कण्डूयते (२) अस्यति (३) कृष्णायते (४) मन्तूयति

(५) कण्डूयियिषति (६) मेधायति (७) दु:ख्यति (८) अश्वस्यति

**प्रश्न:-७ निम्नलिखितेषु दशप्रश्नानां लघूत्तरं लेख्यम् |** १०

(१) कर्तु: प्रयोजकस्य कर्तुसंज्ञया सह का अन्या संज्ञा भवति ?

(२) “हेतुमति च “ सूत्रेण कस्य प्रत्ययस्य विधानं भवति ?

(३) पठ-धातो: णिचि परे उपधादीर्घ: केन सूत्रेण भवति ?

(४) “अज्झनगमां सनि” सूत्रेण किं कार्यं भवति ?

(५) रुरुदिषति इत्यत्र उपधागुण-बाधकं सूत्रं किम् ?

(६) अभ्यासस्य गुण: केन सूत्रेण भवति ?

(७) क्रियासमभिहार: इत्युक्ते किम् ?

(८) यङ्लुगन्तेभ्य: धातुभ्य: क: विकरण: क्रियते ?

(९) “यङो वा सूत्रेण क: आगमो भवति ?

(१०) पुत्रीयति इत्यत्र अकारस्य स्थाने ईत्-आदेश: केन सूत्रेण भवति ?

(११) कण्ड्वादिभ्यो धातुभ्य: क: प्रत्ययो भवति ?

(१२) कण्ड्वादय: धातव: सन्ति अथवा प्रातिपदिकानि ?

(१३) ‘कण्डूयते’ इत्यत्र यक् प्रत्ययस्य कित्करणस्य किं फलं वर्तते ?

(१४) इच्छार्थकसनन्तात् पुन: सन्प्रत्ययो भवति न वा ?

(१५) पुत्रशब्दात् क्यचि सनि च कृते किं रूपं सिद्ध्यति ?